# ॥ गोदाष्टोत्तरशतनामस्तोत्रम् ॥

## ॥ ध्यानम् ॥

शतमखमणि नीला चारुकह्लारहस्ता
स्तनभरनमिताङ्गी सान्द्रवात्सल्यसिन्धुः।
अलकविनिहिताभिः स्रग्भिराकृष्टनाथा
विलसतु हृदि गोदा विष्णुचित्तात्मजा नः ॥

## ॥ स्तोत्रम् ॥

श्रीरङ्गनायकी गोदा विष्णुचित्तात्मजा सती।
गोपीवेषधरा देवी भूसुता भोगशालिनी ॥ १ ॥

तुलसीकाननोद्भूता श्रीधन्विपुरवासिनी।
भट्टनाथप्रियकरी श्रीकृष्णहितभोगिनी ॥ २ ॥

आमुक्तमाल्यदा बाला रङ्गनाथप्रिया परा।
विश्वम्भरा कलालापा यतिराजसहोदरी ॥ ३ ॥

कृष्णानुरक्ता सुभगा सुलभश्रीः सलक्षणा।
लक्ष्मीप्रियसखी श्यामा दयाञ्चितदृगञ्चला ॥ ४ ॥

फल्गुन्याविर्भवा रम्या धनुर्मासकृतव्रता।
चम्पकाशोक-पुन्नाग-मालती-विलसत्-कचा ॥ ५ ॥

आकारत्रयसम्पन्ना नारायणपदाश्रिता।
श्रीमदष्टाक्षरीमन्त्र-राजस्थित-मनोरथा ॥ ६ ॥

मोक्षप्रदाननिपुणा मनुरत्नाधिदेवता।
ब्रह्मण्या लोकजननी लीलामानुषरूपिणी ॥ ७ ॥

ब्रह्मज्ञानप्रदा माया सच्चिदानन्दविग्रहा।
महापतिव्रता विष्णुगुणकीर्तनलोलुपा॥ ८॥

प्रपन्नार्तिहरा नित्या वेदसौधविहारिणी।
श्रीरङ्गनाथमाणिक्यमञ्जरी मञ्जुभाषिणी॥ ९॥

पद्मप्रिया पद्महस्ता वेदान्तद्वयबोधिनी।
सुप्रसन्ना भगवती श्रीजनार्दनदीपिका॥ १०॥

सुगन्धवयवा चारुरङ्गमङ्गलदीपिका।
ध्वजवज्राङ्कुशाब्जाङ्क-मृदुपाद-लताञ्चिता॥ ११॥

तारकाकारनखरा प्रवालमृदुलाङ्गुली।
कूर्मोपमेय-पादोर्ध्वभागा शोभनपार्ष्णिका॥ १२॥

वेदार्थभावतत्त्वज्ञा लोकाराध्याङ्घ्रिपङ्कजा।
आनन्दबुद्बुदाकार-सुगुल्फा परमाऽणुका॥ १३॥

तेजःश्रियोज्ज्वलधृतपादाङ्गुलि-सुभूषिता।
मीनकेतन-तूणीर-चारुजङ्घा-विराजिता ॥ १४॥

ककुद्वज्जानुयुग्माढ्या स्वर्णरम्भाभसक्थिका।
विशालजघना पीनसुश्रोणी मणिमेखला॥ १५॥

आनन्दसागरावर्त-गम्भीराम्भोज-नाभिका।
भास्वद्वलित्रिका चारुजगत्पूर्ण-महोदरी॥ १६॥

नववल्लीरोमराजी सुधाकुम्भायितस्तनी।
कल्पमालानिभभुजा चन्द्रखण्ड-नखाञ्चिता॥ १७॥

सुप्रवाशाङ्गुलीन्यस्तमहारत्नाङ्गुलीयका।
नवारुणप्रवालाभ-पाणिदेश-समञ्चिता ॥ १८ ॥

कम्बुकण्ठी सुचुबुका बिम्बोष्ठी कुन्ददन्तयुक्।
कारुण्यरस-निष्यन्द-नेत्रद्वय-सुशोभिता ॥ १९ ॥

मुक्ताशुचिस्मिता चारुचाम्पेयनिभनासिका।
दर्पणाकार-विपुल-कपोल-द्वितयाञ्चिता ॥ २० ॥

अनन्तार्क-प्रकाशोद्यन्मणि-ताटङ्क-शोभिता।
कोटिसूर्याग्निसङ्काश-नानाभूषण-भूषिता ॥ २१ ॥

सुगन्धवदना सुभ्रू अर्धचन्द्रललाटिका।
पूर्णचन्द्रानना नीलकुटिलालकशोभिता ॥ २२ ॥

सौन्दर्यसीमा विलसत्-कस्तूरी-तिलकोज्ज्वला।
धगद्ध-गायमानोद्यन्मणि-सीमन्त-भूषणा ॥ २३ ॥

जाज्वल्यमान-सद्रत्न-दिव्यचूडावतंसका ।
सूर्यार्धचन्द्र-विलसत्-भूषणाञ्चित-वेणिका ॥ २४ ॥

अत्यर्कानल-तेजोधिमणि-कञ्चुकधारिणी ।
सद्रत्नाञ्चितविद्योत-विद्युत्कुञ्जाभ-शाटिका ॥ २५ ॥

नानामणिगणाकीर्ण-हेमाङ्गदसुभूषिता ।
कुङ्कुमागरु-कस्तूरी-दिव्यचन्दन-चर्चिता ॥ २६ ॥

स्वोचितौज्ज्वल्य-विविध-विचित्र-मणि-हारिणी।
असङ्ख्येय-सुखस्पर्श-सर्वातिशय-भूषणा ॥ २७ ॥

मल्लिका-पारिजातादि दिव्यपुष्प-स्रगञ्चिता।
श्रीरङ्गनिलया पूज्या दिव्यदेशसुशोभिता॥ २८॥

॥ इति श्री-गोदाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Goda_Ashtottara_Shatanama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits